हिरण्यकेशिन् विवाह मन्त्राः

१.१९.४. सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥

१.१९.७. अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् । स्वाहा ॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिप्रबुध्यतामियम् स्वाहा ॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु । मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज प्रजां पश्यन्ती सुमनस्यमानाम् । स्वाहा ॥ द्योस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयतस्ते पुत्रान्सविताभिरक्षतु । आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् । स्वाहा ॥ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाधम् । शीर्ष्णाः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पापम् । स्वाहा ॥ देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पिशाचान् । क्रव्यादो मृत्यूनधरान्पादयामि दीर्घमायुस्तव जीवन्तु पुत्राः । स्वाहा ॥

१.१९.८. आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ।
प्रमृणीहि दुरस्यून्सहस्व पृतनायतः ॥

१.२०.१. गृह्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर्यथासत् ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥

१.२०.२. अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुवर्चाः । जीवसूर्वीरसूः स्योना शं न एधि द्विपदे शं चतुष्पदे ॥ तां नः पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति । या न ऊरू उशती विस्रयातै यस्यामुशन्तः प्रहरेम शेपम् ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयोहं मनुष्यजाः ॥ सोमोददाद्गन्धर्वाय गन्धर्वोग्नयेददात् । पशूंश्च मह्यं पुत्रांश्चाग्निर्ददात्यथो त्वाम् ॥ अमूहमस्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कुरु । दशास्यां पुत्रानादेहि पतिमेकादशं कुरु ॥

१.२०.३. इमाँल्लाजानावपामि समृद्धिकरणान्मम ।
तुभ्यं च संवननं तदाग्निरनुमन्यतामयम् ॥

१.२०.४. इयं नार्युपब्रूतेग्नौ लाजानावपन्ती ।

दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
१.२०.५. विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥
१.२१.१. एकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्तान्वेतु । चत्वारि मायोभवाय विष्णुस्तान्वेतु । पञ्च पशुभ्यो विष्णुस्तान्वेतु । षड्रायस्पोषाय विष्णुस्तान्वेतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्तान्वेतु ॥
१.२१.२. सखायौ सप्तपदाबभूव सख्यं ते गमेयं सख्यात्रे मा योषं सख्यान्मे मा योष्ठाः ॥
१.२१.४. प्राणानां ग्रन्थिरसि स मा विस्रसः ॥
१.२१.५. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विग्निः ।
या अग्निं गर्भे दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥
पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥ (अनूवाक्- तै.ब्रा १.४.८.)
१.२२.११. देवीः षड्डुर्वीरुरु णः कृणोत विश्वे देवास इह वीरयध्वम् ।
१.२२.१२,१३. मा हस्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥
१.२२.१४. सप्तर्षयः प्रथमां कृत्तिकानामरुन्धती ये ध्रुवतां ह निन्युः ।
षट्कृत्तिकामुख्ययोगं वहन्तीयमस्माकं भ्रजत्वष्टमी ॥
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवत स्थितम् । त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥ नमो ब्रह्मणे ध्रुवायाच्युतायास्तु नमो ब्रह्मणः पुत्राय प्रजापतये नमो ब्रह्मणः पुत्रेभ्यो देवेभ्यस्त्रयस्त्रिंशेभ्यो नमो ब्रह्मणः पुत्रपौत्रेभोङ्गिरोभ्यः ॥
यस्त्वा ध्रुवमच्युतं सपुत्रं सपौत्रं ब्रह्म वेद ध्रुवा अस्मिन्पुत्राः पौत्रा भवन्ति । प्रेष्यान्तेवासिनो वसनं कम्बलानि कंसं हिरण्यं स्त्रियो राजानोन्नमभयमायुः कीर्तिर्वर्चो यशो बलं ब्रह्मवर्चसमन्नाद्यमित्येयातानि मयि सर्वाणि ध्रुवाण्यच्युतानि सन्तु ॥
१.२३.१. ध्रुवं त्वा ब्रह्म वेद ध्रुवोहमस्मिँल्लोकेस्मिंश्च जनपदे भूयासम् ॥ अच्युतं त्वा ब्रह्म वेद माहमस्माल्लोकादस्माच्च जनपदाच्च्योषि द्विषन्मे

भ्रातृव्योस्माल्लोकादस्माच्च जनपदाच्च्यवताम् । अचेष्टं त्वा ब्रह्म वेद माहमस्माल्लोकादस्माच्च जनपदाच्चेष्टिषि द्विषन्मे भ्रातृव्योस्माल्लोकादस्माच्च जनपदाछेष्टिताम् । अव्यथमानं त्वा ब्रह्म वेद माहमस्माल्लोकादस्माच्च जनपदाद्व्यथिषि द्विषन्मे भ्रातृव्योस्माल्लोकादस्माच्च जनपदाद्व्यथताम् ॥ नभ्यं त्वा सर्वस्य नभ्यमहमस्य जनपदस्य भूयासम् । मध्यं त्वा सर्वस्य वेद मध्यमहमस्य जनपदस्य भूयासम् । तन्तिं त्वा सर्वस्य वेद तन्तिरहमस्य जनपदस्य भूयासम् । मेथीं त्वा सर्वस्य वेद मेथ्यहमस्य जनपदस्य भूयासम् । नाभिं त्वा सर्वस्य वेद नाभिरहमस्य जनपदस्य भूयासम् । यथा नाभिः प्राणानां विषूवानेवहमहं विषूवान् । एकशतं तं पाप्मानमृच्छतु योस्मान्द्वेष्टि यं च वयं द्विष्मो भूयांसि मामेकशतात्पुण्यान्यागच्छन्तु ॥

१.२४.१. अग्ने प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै घोरा तनूस्तामितो नाशय स्वाहा ॥ वायो प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै निन्दिता तनूस्तामितो नाशय स्वाहा ॥ आदित्य प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामितो नाशय स्वाहा ॥ आदित्य प्रायश्चित्ते वायो प्रायश्चित्तेग्ने प्रायश्चित्तेग्ने प्रायश्चित्ते वायो प्रायश्चित्त आदित्य प्रायश्चित्ते ॥

१.२४.२. भूर्भगं त्वयि जुहोमि स्वाहा ॥ भुवो यशस्त्वयि जुहोमि स्वाहा ॥ सुवः श्रियं त्वयि जुहोमि स्वाहा ॥ भूर्भुवः सुवस्त्विषिं त्वयि जुहोमि स्वाहा ॥

१.२४.३. अभि त्वा पञ्चशाखेन शिवेनाविद्विषावता । साहस्रेण यशस्विना हस्तेनाभिमृशामसि सुप्रजास्त्वाया ॥

१.२४.४. सं त्वा सं हृदयानि सं नाभिः सं त्वचः । सं त्वा कामस्य योक्त्रेण युञ्जान्यविमोचनाय ॥

१.२४.५. मामनुव्रता भव सहचर्या मया भव । या ते पतिघ्नी तनूर्जारघ्नीं त्वेतां करोमि । शिवा त्वं मह्यमेधि क्षुरपविर्जारेभ्यः ॥

१.२४.६. मधु हे मध्विदं मधु जिह्वा मे मधुवादिनी । मुखे मे सारघं मधु दत्सु संवननं कृतम् ॥ चाक्रवाकं संवननं यन्नदीभ्य उदाहृतम् । यद्युक्तो देवगन्धर्वस्तेन संवनिनौ स्वके ॥

१.२५.१. विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिञ्चतु प्रजापतिधाता गर्भं दधातु ते ॥ गर्भं देहि सिनीवालि गर्भं देहि सरस्वति । गर्भं ते अश्विनावुभावाधत्तां पुष्करस्रजौ । हिरण्ययी अरणीं यं निर्मन्थतो अश्विना । तं ते गर्भं हवामहे दशमास्याय सूतवे ॥ यथाग्निगर्भा पृथिवी द्यौर्यथेन्द्रेण गर्भणी । वायुर्यथा दिशां गर्भ एवं दधामि ते ॥ यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो जायतां गर्भो अन्तः । तं माता दश मासो बिभर्तु स जायतां वीरतमः स्वानाम् ॥ आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम् । आ वीरो अत्र जायतां पुत्रस्ते दशमास्यः ॥ करोमि ते प्रजापत्यमा गर्भो योनिमेतु ते । अनूनः पूर्णो जायतामनन्धोश्लोणोपिशाचधीरः ॥ यानि प्रभूणि वीर्याण्यृषभा जनयन्तु नः । तैस्त्वं गर्भिणी भव स जायतां वीरतमः स्वानाम् ॥ यो वशायां गर्भो यश्च वेहतीन्द्रस्तं निदधे वनस्पतौ । तेन त्वं गर्भिणी भव सा प्रसूर्धेनुगा भव ॥

१.२५.२. भूः प्रजापतिनात्यृषभेण स्कन्दयामि वीरं धत्स्वासौ । भुवः प्रजापतिनात्यृषभेण स्कन्दयामि वीरं धत्स्वासौ । सुवः प्रजापतिनात्यृषभेण स्कन्दयामि वीरं धत्स्वासौ ॥